International Journal of Scientific Research in Science, Engineering and Technology
Print ISSN: 2395-1990 | Online ISSN : 2394-4099 (www.ijsrset.com)

# चतुर्विंशाक्षांशदेशेषु छायाभावदिवसविचार:

## (ZERO SHADOW DAY BETWEEN $0^0$ to $24^0$ LATITUDE AREAs)

डॉ. चित्तरञ्जननायक:
सहायकाचार्य:, ज्योतिषविभाग:, राष्ट्रियसंस्कृतविश्वविद्यालय:, तिरुपति:, आ.प्र.

**Article Info**
Volume 7 Issue 6
Page Number: 322-326
Publication Issue :
November-December-2020
**Article History**
Accepted : 15 Dec 2020
Published : 30 Dec 2020

**सारांश:** - सिद्धान्त-संहिता-होरेत्यस्य त्रिस्कन्धज्योतिषशास्त्रस्य सिद्धान्तस्कन्धे दिग्देशकालनिर्णयावसरे शङ्कोच्छायाया: विचार: प्रयोगश्च कृतं वर्तते। परन्तु शोधप्रबन्धेऽस्मिन् शङ्कोच्छायाभावस्य विचार: क्रियते। एतस्मिन् शोधप्रबन्धे क्रमोत्क्रज्यामानानि, ज्ययोरन्तरमानानि, अक्षज्या क्रान्तिज्या च आनयनम्, छायाशून्यानयनविधि:, तिरुपत्यक्षांशस्य छायाशून्यदृश्यम्, प्रसिद्धसाक्षदेशेषु छायाशून्यदिनाङ्का:, छायाशून्यस्योपयोगश्चेत्यनेका: विषया: समुल्लिखिता: सन्ति।

**मुख्यशब्दा:-** अक्षांशज्ञानम्, क्रान्त्यंशज्ञानम्, छायाभ्रमणम्, दशमलग्नम् (नताभाव:), अग्राभाव:, $12^0$ साक्षदेशस्य पलभाया: विषेषता, यनांशपरिशीलनम्, अयनांश संशोधनम्, क्रमोत्क्रज्यामानानि, गतज्याखण्ड:, गतगम्यज्या, ज्ययोरन्तरमानानि, अक्षज्या, क्रान्तिज्या, छायाशून्यानयनविधि:, तिरुपत्यक्षांशस्य छायाशून्यदृश्यम्, प्रसिद्धसाक्षदेशेषु छायाशून्यदिनाङ्क:, याशून्यस्योपयोगश्चेति ।

**उपक्रम:** – यदा साक्षक्षेत्रस्य खमध्ये सायनसूर्य: समायाति तदा तस्य साक्षक्षेत्रस्य मध्याह्नकाले शङ्को: च्छाया नैव उत्पन्ना भवति (छायाभावेत्यर्थ:)। अक्षांशतुल्यो सूर्यस्य क्रान्त्यंश: यदा समानं भवति तदा तद् तद् देशे छायाभावो जायते। एतद् चतुर्विंशत्यक्षांशप्रदेशाभ्यन्तरे एव सम्भवति। गणितागतरीत्या छायाशून्यसाधनाय अक्षांश:, अक्षज्या, मध्याह्नकालिकसायनसूर्य:, सायनसूर्यस्य क्रान्त्यंश:, क्रान्तिज्या इति एतेषां प्रमुखविषाणामावश्यकता वर्तते। तत्र तावत् प्रथमम् अक्षज्यानयनं सूर्यसिद्धान्ते यथा –

| ज्याक्रम: | क्रमज्यामानम् | ज्ययोरन्तरम् | ज्याक्रम: | उत्क्रमज्यामानम् | ज्ययोरन्तरम् |
|---|---|---|---|---|---|
| 1 | 225 | ---- | 1 | 7 | 22 |
| 2 | 449 | 224 | 2 | 29 | 37 |
| 3 | 671 | 222 | 3 | 66 | 51 |
| 4 | 890 | 219 | 4 | 117 | 65 |
| 5 | 1105 | 215 | 5 | 182 | 79 |
| 6 | 1315 | 210 | 6 | 261 | 93 |
| 7 | 1520 | 205 | 7 | 354 | 107 |

**Copyright :** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

| | | | | | |
|---|---|---|---|---|---|
| **8** | **1719** | **199** | **8** | **461** | **118** |
| **9** | **1910** | **191** | **9** | **579** | **131** |
| **10** | **2093** | **183** | **10** | **710** | **143** |
| **11** | **2267** | **174** | **11** | **853** | **154** |
| **12** | **2413** | **164** | **12** | **1007** | **164** |
| **13** | **2585** | **154** | **13** | **1171** | **174** |
| **14** | **2728** | **143** | **14** | **1345** | **183** |
| **15** | **2859** | **131** | **15** | **1528** | **191** |
| **16** | **2977** | **118** | **16** | **1719** | **199** |
| **17** | **3084** | **107** | **17** | **1918** | **205** |
| **18** | **3177** | **93** | **18** | **2123** | **210** |
| **19** | **3256** | **79** | **19** | **2333** | **215** |
| **20** | **3321** | **65** | **20** | **2548** | **219** |
| **21** | **3372** | **51** | **21** | **2767** | **222** |
| **22** | **3409** | **37** | **22** | **2989** | **224** |
| **23** | **3431** | **22** | **23** | **3213** | **225** |
| **24** | **3438** | **7** | **24** | **3438** | **----** |

**अक्षज्यानयनम्** –

**लिप्तास्तत्वयमैर्भक्ता लब्धं ज्यापिण्डकं गतम्।**

**गतगम्यान्तराभ्यस्तं विभजेत् तत्त्वलोचनैः।।31।।**

**तदवाप्तफलं योज्यं ज्यापिण्डे तगसंज्ञके।**

**स्यात् क्रमज्या विधिरयमुत्क्रमज्यास्वपि स्मृतः।।32।।** (सूर्यसिद्धान्तः, स्पष्टाधिकारः)

भास्कराचार्येण यथा–

**तत्त्वाश्विभक्ता असवः कला वा तल्लब्धसंख्या गतशिञ्जिनी सा।।10।।**

**यातैष्यजीवान्तरशेषघातात् तत्त्वाश्विलब्ध्या सहितेप्सितास्यात्।**

(सिद्धान्तशिरोमणिः, स्पष्टाधिकारः)

वृत्तचतुर्थांशे खखाब्धिविषयाः ($5400'$) कलाः भवन्ति। वृत्तपादस्य चतुर्विंशतिभागः प्रथमज्यार्ध एव। नाम $5400' \div 24 = 225'$ तत्त्वाश्विकलाः। आदौ तावद् अक्षज्यानेया। तदर्थमादौ अक्षांशाः कलात्वेन परिणमनीयाः। ताः कलाः तत्त्वाश्विभिः भाज्याः। फलं यद् आगच्छति तद् गतज्या एव। शेषकलाः गम्यज्यायाः अन्तर्भवति। अतोऽत्र त्रैराशिकविधिः। तत्त्वाश्विकलाभिः ($225'$) यदि गतगम्यज्ययोरन्तरज्यामानं लभ्यते शेषकलाभिः किमिति ? विधिना

फलं शेषकलायाः ज्यामानम् आयाति। तच्चज्यामानं गतज्यामानेन योज्यते चेद् इष्टज्या सम्भवति। यथा –

$\frac{\text{अक्षकला:}}{225}$ = लब्धिः गतज्याक्रमङ्कः। शेषकलाः गम्यज्यायाः अन्तर्भवति। अतः $\frac{(\text{गम्यज्या} - \text{गतज्या}) \times \text{शेषकला:}}{225}$ =

लब्धिः शेषकलासम्बन्धिज्या। अतः गतज्यामानम् + लब्धज्यामानम् = अभीष्टज्या। तदेवात्राक्षज्या ग्राह्या।

**अतोऽत्र तिरुपतिक्षेत्रस्य अक्षाज्यानयनं क्रियते** –

(क) तिरुपति–अक्षांशमानम् $13^0 - 39^{।}$ कलाः । इतियुक्ते $819^{।}$ कलाः ।

(ख) $\frac{819 \text{ कलाः}}{225} = 3$ लब्धिः गतज्या। नाम तृतीयज्यार्धं गतमिति। शेषः $144^{।}$ कलाः। चतुर्थज्यार्धान्तर्भवति।

(ग) चतुर्थज्यार्धमानं 890 किञ्च तृतीयज्यार्धमानं 671। अतः 890 – 671 = 219 चतुर्थतृतीययोर्ज्यार्धान्तरम्।

(घ) अतः $\frac{219 \times 144 \text{ शेषकलाः}}{225} = 140/10$ लब्धिः।

(ङ) तृतीयज्यार्धमानं 671 + 140/10 = 811/10 इति तिरुपत्यक्षांशस्य ज्यामानम् इदम्।

**इदानीं क्रान्तिज्यानयनं तस्या चापानयनञ्च -**

**परमापक्रमज्या तु सप्तरन्ध्रगुणेन्दवः।**

**तद्गुणा ज्या त्रिजीवाप्ता तच्चापं क्रान्तिरुच्यते।।28।।** (सूर्यसिद्धान्तः, स्पष्टाधिकारः)

यदि त्रिज्यातुल्यग्रहभुजज्यायां जिनांशज्यातुल्यापमज्या लभ्यते तदाभीष्टग्रहभुजज्याया किमिति ? त्रैराशिक–विधिना इष्टस्थानीया क्रान्तिज्या प्राप्यते इत्यर्थः। क्रान्तिज्यायाः चापं क्रान्त्यंशाः सम्भवन्ति।

(क) $\frac{\text{परमक्रान्त्यंशज्या} \times \text{सायनसूर्यस्य भुजज्या}}{\text{त्रिज्या}} =$ इष्टक्रान्तिज्या। अत्रेष्टक्रान्तिज्याः धनुः करणीया । अतः

(ख) इष्टक्रान्तिज्या ÷ 225 = लब्धिः गतज्याखण्डः। शेषज्या गम्यज्यान्तर्भवतीति।

(ग) गतज्याखण्डः × 225 = गतकलाः।

(घ) $\frac{225 \times \text{शेषज्यया}}{(\text{गम्यज्या} - \text{गतज्या})} =$ लब्धकलाः।

(ङ) गतकलाः + लब्धकलाः = सायनसूर्यस्य मध्यमक्रान्तिकलाः आयान्ति। एते कलाः षष्ट्या भक्ताश्चेत् मध्यमक्रान्त्यंशाः आयान्ति।

**छायाभावदिनानयनविधिः -**

ईदानीं तिरुपति–अक्षांशस्य छायाशून्यानयनं क्रियते यथा – अक्षांशमानं $13^0/39^{।}$, (पलभामानम् $2^{\text{अं}}.52^{\text{व्यं}}$)

अतः सायनसूर्यस्य क्रान्त्यंशमानं यदा $13^0/39^{।}$ भवति तदा मध्याह्नकाले शङ्कोः च्छाया नैव सम्भवति। यदा सायनसूर्यः मेषराशिम् अतिक्रामति तदा क्रान्त्यंशप्रमाणं $11^0$, वृषभान्ते $11^0 + 8^0 = 19^0$ , मिथुनान्ते $19^0 + 5^0 = 24^0$ क्रान्त्यंशाः भवन्ति । अतः सायनसूर्यः बृषभराशौ सञ्चरते काले तिरुपतिम् अतिक्रामतीत्यर्थः । अतः अष्टौ क्रान्त्यंशाभ्यन्तरे यदि त्रिंशद्दिनानि लभ्यन्ते तर्हि वृषभस्थैकक्रान्त्यंशेन किमिति त्रैराशिकविधिना $\frac{30 \times 1}{8} = 3.75$। दिनचतुष्टयमित्यर्थः। वृषभराशेः एकक्रान्त्यंशनिमित्तं मध्यममानेन चतुर्दिनानि भवन्तीति। इतोऽपि $13^0/39^{।} - 11^0 = 2^0/39^{।}$ क्रान्त्यंशाः अपेक्षिताः। अतः मध्यममानेन सायनबृषसंक्रान्त्यनन्तरं दशमदिने सायनसूर्यस्य क्रान्त्यंशाः $13^0/39^{।}$ भवन्ति। तदानीं तिरुपत्यक्षांशे मध्याह्नकाले छायाशून्यं सम्भवति। (अयञ्च मध्यमविधिः।) तद् प्रायोगिकदृष्ट्या मया परिशीलिता वर्तते । एतद् April मासस्य पञ्चविंशे दिनाङ्कें तिरुपत्यक्षांशे मध्याह्नकाले शङ्कोः छायाभावः निश्चयेन जायते। एतस्य परीक्षणस्य छायाचित्रमपि अधः प्रस्तूयते।

तिरुपति–अक्षांशस्य छायाभावदृश्यम्, तद् April मासस्य 25 दिनाङ्के सम्भवति।

**छायायाः प्रथमावस्था**



**छायायाः द्वितीयावस्था**



**छायायाः तृतीयावस्था**



**छायायाः**



**छायायाः अभावावस्था**



**छायानिर्गमनस्य मार्गः**



## चतुर्विंशाक्षांशाभ्यन्तरे प्रसिद्धनगराणां छायाभावदिनसारणी

| Place | Latitude | Zero shadow day |
|---|---|---|
| Thiruvanantapuram | $8^{0}$ -$29^{I}$ | April - 11 |
| Rameswaram | $9^{0}$ -$17^{I}$ | April- 14 |
| Tanjavur | $10^{0}$ -$47^{I}$ | April- 16 |
| Mysore | $12^{0}$ -$18^{I}$ | April- 22 |
| Bangalore | $13^{0}$ - $00^{I}$ | April - 23 |
| Chennai | $13^{0}$ - $05^{I}$ | April -23 |
| Tirupati | $13^{0}$ - $39^{I}$ | April -25 |
| Nellor | $14^{0}$ - $26^{I}$ | April -29 |
| Panaji | $15^{0}$ - $29^{I}$ | May - 03 |
| Vijayawada | $16^{0}$ - $31^{I}$ | May- 09 |
| Hyderabad | $17^{0}$ - $23^{I}$ | May-14 |

| Place | Latitude | Zero shadow day |
|---|---|---|
| Pune | $18^{0}$ - $32^{I}$ | May-20 |
| Mumbai | $19^{0}$ - $00^{I}$ | May-22 |
| Puri | $19^{0}$ - $48^{I}$ | May-27 |
| Bhubaneswar | $20^{0}$ - $14^{I}$ | Jun-03 |
| Nagpur | $21^{0}$ - $09^{I}$ | Jun-09 |
| Balasore | $21^{0}$ - $30^{I}$ | Jun-12 |
| Howrha | $22^{0}$ - $35^{I}$ | Jun-19 |
| Ahamadabad | $23^{0}$ - $02^{I}$ | Jun-20 |
| Ujjain | $23^{0}$ -$11^{I}$ | Jun-21 |
| Bhopal | $23^{0}$ -$16^{I}$ | Jun-22 |

**छायाशून्यस्योपयोगः -**

सायनसूर्याद् अक्षांशज्ञानम्, क्रान्त्यंशज्ञानम्, छायाभ्रमणम्, दशमलग्नम् (नताभावः), अग्राभावः, $12^0$ साक्षदेशस्य पलभायाः विषेषता तथा यनांशपरिशीलनं संशोधनञ्च कर्तुं शक्यते।इति।

सन्दर्भग्रन्थाः

1. **सूर्यसिद्धान्तः** – चौखम्बासुरभारती प्रकाशन, वाराणसी
2. **सिद्धान्तशिरोमणिः** – चौखम्बासुरभारती प्रकाशन, वाराणसी
3. **सिद्धान्तशेखरः** – चौखम्बासुरभारती प्रकाशन, वाराणसी
4. **आर्यभटीयम्** – चौखम्बासुरभारती प्रकाशन, वाराणसी
5. **अर्वाचीनं ज्योतिर्विज्ञानम्** – चौखम्बासुरभारती प्रकाशन, वाराणसी